## खण्ड-A / Section-A

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (150) शब्दैः संस्कृतभाषयैव देवनागरीलिप्यामेव च विधीयताम् :- $4 \times 5 = 20$

    (i) शुकनासोपदेशस्य साम्प्रतिकमुपादेयत्वं विशद्यताम् ।

    (ii) नैषधीयचरितस्य महाकाव्यत्वं विविच्यताम् ।

    (iii) नवसर्गगते माघे नवशब्दो न विद्यते — सूक्तिमेतां सयुक्तिकं सोदाहरणञ्च प्रतिपाद्यताम् ।

    (iv) स पिता पितरस्तासां केवलं जन्महेतवः — इति वचसः आशयः राजधर्मदृशा विविच्यताम् ।

2. अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत : –

    (a) कौटिलीयार्थशास्त्रे वर्णितानां राजधर्मविषयकसिद्धान्तानां समकालिकमुपादेयत्वम् । 10

    **Examine the contemporary significance of the ideas of good governance depicted in Kauṭilīya Arthaśāstra.**

    (b) ईशावास्योपनिषद्दृष्ट्या विद्याद्वयस्य ज्ञानमुभयं सह अपेक्षितम् । 10

    **Discourse on simultaneous knowledge of two types of Vidyā are essential as per Īśāvāsyopaniṣad.**

3. अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया:-

    (a) अविश्रमोऽयं लोकतन्त्राधिकारः — इत्युक्तिं साम्प्रतिकपरिप्रेक्ष्ये सयुक्तिकं विशदयत । 10

    **Explain the statement-अविश्रमोऽयं लोकतन्त्राधिकारः in the light of modern perspective.**

    (b) रत्नावलीनाटिकायाः वैशिष्ट्यम् उपादेयत्वञ्च निरूप्यताम् । 10

    **Reveal the specialty and utility of Ratnāvalīnāṭikā.**

4. संस्कृतभाषयैव देवनागरीलिप्यामेव अधोलिखितयोः सङ्क्षिप्तटिप्पणी लिख्यताम्: -

    (a) नीतिशतकम् 10

    (b) मेघदूतम् 10

